# अभ्यासः 1: English to Sanskrit

**Instruction:** All the words in Exercise-1 end in अ and are of masculine gender. The sentences should be translated to Sanskrit in the active and passive voice.

1. Rama reads a Veda
   राम पठति/पठ्यते वेद
2. A person reads a word
   जन/नर पठति/पठ्यते शब्द
3. A man writes a book
   नर/जन लिखति/लिख्यते ग्रन्थ
4. A person writes a mantra
   मन्त्र
5. A person sings a verse
   गायति/गीयते श्लोक
6. Rama reads mantras
7. Man writes a verse
8. Bharata salutes Rama
   भरत वन्दते/वन्द्यते
9. Lakshmana salutes Krishna
   लक्ष्मण नमति कृष्ण
10. A devotee worships Rama
    भक्त अर्चति/अर्च्यते
11. A devotee salutes Rama
12. A devotee meditates on Shiva
    श्रमण ध्यायति/ध्यायते शिव
13. A devotee thinks of Hara
    चिन्तयति/चिन्त्यते हर
14. A cook cooks rice
    सूद पचति ओदन
15. A disciple remembers Rama
    शिष्य स्मरति/स्मर्यते
16. A soldier protects nation
    सैनिक रक्षति देश
17. Servant serves king
    सेवक सेवते नृप
18. A boy gets jaggery
    बाल लभते गुड
19. A disciple learns a Veda
    शिक्षते
20. Student talks to a man
    छात्र भाषते जन/नर
21. Man decorates statue
    पुरुष मण्डति विग्रह
22. A cat buries a fish.
    बिडाल कीलति मीन
23. Men desire liberation
    नर काङ्क्षति मोक्ष
24. Teacher praises Ganesh
    शिक्षक शंसति/शस्यते गणेश
25. The sun protects a person
    सूर्य अवति लोक
26. A beggar earns rice
    भिक्षुक अर्जति तण्डुल
27. Dog releases a cat
    कुक्कुर मुञ्चति/मुच्यते मार्जार
28. God praises Shiva
    देव श्लाघते शिव
29. A son speaks a word
    पुत्र वदति/उद्यते शब्द
30. An uncle speaks a joke
    पितृव्य गदति विनोद
31. A chap recites mantra
    माणवक जपति मन्त्र
32. Donkey carries weight
    गर्दभ वहति/उह्यते भार
33. The fire burns staff/stick
    अनल दहति दण्ड

34. The king goes to temple
महाराज गच्छति/गम्यते देवालय

35. The God sees a bud
ईश्वर पश्यति/दृश्यते मुकुल

36. A youth eats honey
तरुण खादति मकरन्द

37. Dog desires care
कुक्कुर कामयते आदर

38. Son wants affection
पुत्र इच्छति/इष्यते स्नेह

39. God protects the yajna
ईश्वर त्रायते/त्रायते यज्ञ

40. God worships the Lord
देव भजति ईश

41. The king hears news
नृप शृणोति/श्रूयते उदन्त

42. A deer begs for shelter
कुरङ्ग याचते आश्रय

43. A boy crosses a lake
माणवक तरति/तीर्यते तडाग

44. A kid starts efforts
बालक आरभते प्रयत्न

45. Bee takes away honey
मिलिन्द हरति/ह्रियते मकरन्द

46. Bad man criticises wicked man
दुर्जन निन्दति खल

47. Student guesses the meaning
छात्र ऊहते(infer) अर्थ

48. A carpenter chops a tree
तक्षक तक्षति (peel) वृक्ष

49. A boy purchases a mirror
माणवक पणते मुकुर

50. A mad man throws a stone
पागल क्षिपति पाषाण

51. Dispassionate leaves village
विरक्त त्यजति ग्राम

52. A bird drinks juice
खग पिबति/पीयते रस

53. A pupil listens to teacher
शिष्य शृणोति/श्रूयते आचार्य

54. A donkey carries weight
रासभ नयति भार

**णत्वविधिः** - रषाभ्यां नो णः समानपदे। अट्कुप्वाङ्नुम्व्यवायेपि। पदान्तस्य।

**1) र/ष/ऋ [ ] न → ण।**

In a word, if न comes immediately after र or ष or ऋ, then change न to ण. But that न् should not be a last letter of a word.

**2) र/ष/ऋ [सर्व स्वर, हयव, कवर्ग, पवर्ग] न → ण।**

In a word, if there are [सर्व स्वर, हयव, कवर्ग, पवर्ग] these letters and none else between र or ष or ऋ and न, then change न to ण. But that न् should not be a last letter of a word and any letter from तवर्ग should not follow immediately. (उदा. कृष्न इन्द्रियानि वस्त्रानि क्रन्दन रामान् अक्षरानि राक्षसेन द्रवानि रामेन रामानाम् कृपालुना गुणिनाम् ऋन कर्न पर्न भ्रमेन क्रियमान भ्राम्यमान रक्षनम्)

**Note:** 1) A noun and its adjective must be in same लिङ्ग, वचन, विभक्ति
2) Verbal form, either active or passive, must match with anything which is in first case ending.

## अभ्यासः -2: Active-Passive with Krit

**Instruction –** In Exercise-2, any word is of masculine gender if no gender is mentioned. At some places words like वनानि, रामान्, नदी, नदीः, मतीः themselves convey the gender, hence it may not be mentioned. The original sentence should be copied to the notebook and it should be changed to the 2-8 types. Daily 5 sentences should be done.

1. **वाक्यम्** - रामः वेदम् पठति।
2. **कृद्योगः**- रामः वेदस्य पाठम् करोति।
3. **कर्मणि** - रामेण वेदः पठ्यते।
4. **कर्मणि शानच्**- रामेण वेदः पठ्यमानः भवति/अस्ति/वर्तते/विद्यते।
5. **क्त** - रामेण वेदः पठितः।
6. **क्तवतु** - रामः वेदम् पठितवान्।
7. **शतृ** - रामः वेदम् पठन् भवति/अस्ति/वर्तते/विद्यते।
8. **शानच् -** **---**
9. **कृत्याः** - रामेण/रामस्य वेदः पठितव्यः/पठनीयः/पाठ्यः।
10. **कृत्** - रामस्य पाठः। रामेण वेदस्य पाठः। रामः वेदस्य पाठकः। रामः वेदे पठिती।
11. **शाब्दबोधः** - रामकर्तृक-वेदकर्मक-वर्तमानकालिक-पठनम्।

1. रामः शिवम् भजति।
(धातु=भज्, कर्मणि=भज्यते, क्त=भक्त, कृत्=भजनम्/भक्तिः), (कृत्य= तव्य-भक्तव्य, अनीय-भजनीय, य-भाज्य विभाग्य)

2. शिवः रामम् नमति।
(नम् नम्यते नत नमनम्/नतिः)
(नन्तव्य नमनीय नम्य)

3. देवः भक्तम् रक्षति। (रक्ष् रक्ष्यते रक्षित रक्षणम्/रक्षा) (रक्षितव्य रक्षणीय रक्ष्य)

4. चैत्रः मन्त्रम् गदति। (speak) (गद् गद्यते गदित गदनम्) (गदितव्य गदनीय गद्य)

5. शिष्यः ग्रन्थम् पठति।
(पठ् पठ्यते पठित पठनम्/पाठः) (पठितव्य पठनीय पाठ्य)

6. मानवः धर्मम् अर्जति।
(अर्ज् अर्ज्यते अर्जित अर्जनम्)
(अर्जितव्य अर्जनीय अर्ज्य)

7. छात्रः ऋग्वेदम् स्मरति। (स्मृ स्मर्यते स्मृत स्मरणम्/स्मृतिः) (स्मर्तव्य स्मरणीय स्मार्य)

8. भिक्षुकः गोविन्दम् प्रणमति।
(प्र+नम् प्रणम्यते प्रणत प्रणमनम्/प्रणामः)

9. रामः अश्वम् आरोहति। (आ+रुह् आरुह्यते आरूढ आरोहणम्) (रोढव्य रोहणीय रोह्य)

10. गायकः रामगुणम् गायति। (गै गीयते गीत गानम्/गीतिः) (गातव्य गायनीय गेय)

11. अमरः अमृतम् (नपुं) पिबति। (पा पीयते पीत पानम्)(पातव्य पानीय पेय)

12. माणवकः वाक्यम् (नपुं) भणति। (भण् भण्यते भणित भणनम्) (भणितव्य भणनीय भण्य)

13. ईश्वरः विश्वम् (नपुं) अवति।(protect) (अव् अव्यते अवित अवनम्) (अवितव्य अवनीय अव्य)

14. सारमेयः (dog) क्षेत्रम् (नपुं) रक्षति। (रक्ष् रक्ष्यते रक्षित रक्षणम्/रक्षा)

15. कृषीवलः बीजानि (नपुं) वपति।(sow) (वप् उप्यते उप्त वपनम्)(वप्तव्य वपनीय वाप्य)

16. जनाः ईश्वरम् पूजयन्ते। (पूज्+णिच् पूज्यते पूजित पूजनम्/पूजा) (पूजयितव्य पूजनीय पूज्य)

17. पुरुषाः कृष्णम् वन्दन्ते। (वन्द् वन्द्यते वन्दित वदनम्/वन्दना) (वन्दितव्य वन्दनीय वन्द्य)

18. नर्तकः भूषणानि (नपुं) धरति। (धृ ध्रियते धृत धरणम्)(धर्तव्य धरणीय धार्य)

19. सूदाः (cook) अन्नम् (नपुं) पचन्ते। (पच् पच्यते पक्व पचनम्/पाकः/पक्तिः) (पक्तव्य पचनीय पाक्य)

20. नृपः नरान् वदति। (वद् उद्यते उदित वदनम्/वादः) (वदितव्य वदनीय वद्य)

21. याज्ञिकः यज्ञान् यजते। (यज् इज्यते इष्ट यजनम्/यागः) (यष्टव्य यजनीय याज्य)

22. मेघाः जलम् (नपुं) सिञ्चन्ति। (सिच् सिच्यते सिक्त सेचनम्/सेकः ) (सेक्तव्य सेचनीय सेच्य)

23. कृषकः क्षेत्राणि (नपुं) पाति। (पा protect पायते पात पायः) (पातव्य पानीय पेय)

24. भृत्यः जलम् (नपुं) आहरति। (आ+हृ ह्रियते हृत हरणम्) (हर्तव्य हरणीय हार्य हृत्य)

25. सीता अम्बाम् पूजयति। (पूज्+णिच् पूज्यते पूजित पूजनम्/पूजा)

26. अगस्त्यः उमाम् (स्त्री) पूजयति। (पूज्+णिच् पूज्यते पूजित पूजनम्/पूजा)

27. ईश्वरः मायाम् (स्त्री) अवगच्छति। (अव+गम् know गम्यते गत गमनम्) (गन्तव्य गमनीय गम्य)

28. पितामही (स्त्री) कथाम् (स्त्री) कथयति। (कथ कथ्यते कथित कथनम्/कथा) (कथयितव्य कथनीय कथ्य)

29. सः रामः मित्रम् (नपुं) रक्षति। (रक्ष् रक्ष्यते रक्षित रक्षणम्/रक्षा)

30. गौरी (स्त्री) कमलानि (नपुं) पश्यति। (दृश् दृश्यते दृष्ट दर्शनम्) (द्रष्टव्य दर्शनीय दृश्य)

31. व्याधिः रुग्णम् पीडयते। (पीड पीड्यते पीडित पीडनम्/पीडा) (पीडयितव्य पीडनीय पीड्य)

32. दुर्गा (स्त्री) विपत्तिम् (स्त्री) अपहरते।
(अप+हृ ह्रियते हृत हरणम्)
33. रमणी (स्त्री) पुष्पाणि (नपुं) ईक्षते।
(ईक्ष् ईक्ष्यते ईक्षित ईक्षा/ईक्षणम्) (ईक्षितव्य ईक्षणीय ईक्ष्य)
34. तापसः तपोवनम् (नपुं) विशति।
(विश् enter विश्यते विष्ट वेशनम्/वेशः)
(वेष्टव्य वेशनीय वेश्य)
35. वत्सः अनुसरति धेनुम् (स्त्री)।
(अनु+सृ स्रियते सृत सरणम्/सृतिः/सरः)
(सर्तव्य सरणीय सार्य)
36. नाथः ईश्वरं वासुदेवम् प्रणमति।
(प्र+नम् प्रणम्यते प्रणत प्रणमनम्/प्रणामः)
37. आचार्यः पुस्तकम् (पुंनपुं) यच्छति।
(दा दीयते दत्त दानम्)
(दातव्य दानीय देय)
38. नीचाः जनाः सदा कलहम् इच्छन्ति।
(इष् इष्यते इष्ट एषणम्/इच्छा)
(एष्टव्य एषणीय एष्य)
39. देवः इन्द्रः मेघात्(5) जलम् (नपुं) वर्षति।
(वृष् वृष्यते वृष्ट वर्षणम्/वर्षा/वृष्टिः)
(वर्षितव्य वर्षणीय वृष्य वर्ष्य)
40. फलम् भूतले (7) पतति।
(पत् पत्यते पतित पतनम्/पातः)
(पतितव्य पतनीय पात्य)
41. शिवस्य भाले(7 नपुं) इन्दुः अस्ति।
(अस् भूयते भूत भवनम्) इन्दु-moon
(भवितव्य भवनीय भव्य भाव्य)
42. शम्भुः ग्रन्थम् लिखति।
(लिख् लिख्यते लिखित लेखनम्)
43. विष्णुः शेषनागे(7) शेते। (शानच्-शयान)
(शी शय्यते शयित शयनम्)
(शयितव्य शयनीय शेय)
44. श्रान्तः मार्गे (7) निषीदति। (sit)
(नि+सद् निषद्यते निषण्ण निषादः)
(सत्तव्य सदनीय साद्य)
45. दुर्गा(स्त्री) सभायाम् (7) भाषते।
(भाष् भाष्यते भाषित भाषणम्)
46. इन्द्रः नाकात् (नपुं स्वर्ग) अवतरति।
(अव+तॄ तीर्यते तीर्ण/तरित तरणम्/तरः)
(तरितव्य तरीतव्य तरणीय तार्य)
47. क्रूरः दैत्यः मुनीन् विस्मरति।
(वि+स्मृ स्मर्यते स्मृत स्मरणम्/स्मृतिः)
(स्मर्तव्य स्मरणीय स्मार्य)
48. शारदा रम्यां कविताम् (स्त्री) लिखति।
(लिख् लिख्यते लिखित लेखनम्)
(लेखितव्य लेखनीय लेख्य)
49. क्रूरः राक्षसः दुर्बलान् जनान् तुदति।
(व्यथा/पीडा/दुःख देना) (तुद् तुद्यते तुन्न तोदनम्)(तोत्तव्य तोदनीय तोद्य)
50. बुधः मोक्षम् कामयते। (कम् काम्यते कामित/कान्त कामना/कामः) (कामयितव्य कमितव्य कामनीय कमनीय काम्य कम्य)
51. सूर्यः अन्धकारम् नाशयति।
(नश्+णिच् नाश्यते नाशित नाशः/ नाशनम्)
(नाशयितव्य नाशनीय नाश्य)
52. तन्तुवायः वस्त्रम् (नपुं) पाटयति। (tear)
(पट्+णिच् पाट्यते पाटित पाटनम्)
(पाटयितव्य पाटनीय पाट्य)

53. मानवः महतीम् कीर्तिम् (स्त्री) अर्जति।
(अर्ज् अर्ज्यते अर्जित अर्जनम्)
54. छात्रः पुस्तकानि (पुंनपुं) मार्गयति।
(मृग्+णिच् search मृग्यते मृगित मार्गणम्)
(मृगयितव्य मृगणीय मृग्य)
55. माता उमा (स्त्री) काञ्चीम् (स्त्री) गच्छति।
(गम् गम्यते गत गमनम्)
56. प्रखरः अग्निः आर्द्रं काष्ठम् (नपुं) दहति।
(दह् दह्यते दग्ध दहनम्/दाहः)
(दग्धव्य दहनीय दाह्य)
57. चण्डिका (स्त्री) अशुभम् (नपुं) नाशयति।
(नश्+णिच् नाश्यते नाशित नाशः/ नाशनम्)
(नाशयितव्य नाशनीय नाश्य)
58. दैत्यः देवं गणपतिम् विस्मरति।
(वि+स्मृ स्मर्यते स्मृत स्मरणम्/स्मृतिः)
59. लोकः ईश्वरं गणेशम् प्रणमति।
(प्र+नम् प्रणम्यते प्रणत प्रणमनम्/प्रणामः)
60. वामनः मुनिः शुभ्रम् इन्दुम् पश्यति।
(दृश् दृश्यते दृष्ट दर्शनम्)
61. पण्डितः बहून् गुणान् वर्णयति।
(वर्ण् वर्ण्यते वर्णित वर्णनम्/वर्णना)
(वर्णयितव्य वर्णनीय वर्ण्य)
62. तृणानि (नपुं) अश्वाः भक्षयन्ति।
(भक्ष भक्ष्यते भक्षित भक्षणम्)
63. तरुणः शिष्यः वृद्धम् गुरुम् पृच्छति।
(पृच्छ् पृच्छयते पृष्ट पृच्छा)
(प्रष्टव्य पृच्छनीय पृच्छय)
64. मेधावी (मेधाविन्) मनुष्यः देवम् नमति।
(नम् नम्यते नत नमनम्)
65. बलवन्तं दस्युम् ताडयन्ति रक्षकाः।
(ताड् ताड्यते ताडित ताडनम्)
66. तीर्थे वायसः बलिम् भक्षयति। (crow)
(भक्ष भक्ष्यते भक्षित भक्षणम्)
(भक्षयितव्य भक्षणीय भक्ष्य)
67. मुञ्चति निषादः वने बाणम्।
(मुञ्च् मुच्यते मुक्त मोचनम्/मोक्षः/मुक्तिः)
(मोक्तव्य मोचनीय मोक्य)
68. कुपितः पुरुषः बिडालम् ताडयति।
(ताड् ताड्यते ताडित ताडनम्) (ताडयितव्य ताडनीय ताड्य)
69. बुद्धिमान् ऋषिः प्रखरम् अग्निम् प्रशंसति।
(प्र+शंस् शस्यते शस्त शंसनम्/ शंसा/ शस्ति) (शंसितव्य शंसनीय शस्य शंस्य)
70. प्रचण्डः अग्निः आहुतिम् (स्त्री) नयति।
(नी नीयते नीत नयनम्) (नेतव्य नयनीय नेय)
71. नृपतिः प्रबलम् अरिम् (enemy) जयति।
(जि जीयते जित जयः)(जेतव्य जयनीय जेय)
72. अम्बा (स्त्री) वाराणसीम् (स्त्री) गच्छति।
(गम् गम्यते गत गमनम्)
73. भगवान् विधिः दीनबन्धुम् पश्यति।
(दृश् दृश्यते दृष्ट दर्शनम्)
74. महान् नृपः ऋषिम् तोषयति।
(तुष्+णिच् तोष्यते तोषित तोषः)
(तोषयितव्य तोषणीय तोष्य)
75. श्रद्धालुः जनः देवताम् (स्त्री) पूजयति।
(पूज् पूज्यते पूजित पूजनम्/पूजा)
76. कमलम्(नपुं) कवीन् प्रीणयति।
(प्री प्रीयते प्रीत प्रीणनम् please)

77. ईश्वरः रामः देवीम् दुर्गाम् (स्त्री) अर्चति।
(अर्च् अर्च्यते अर्चित अर्चनम्) (अर्चितव्य अर्चनीय अर्च्य)
78. देवी (स्त्री) अशुभनाशाय मतिम् (स्त्री) करोति। (कृ क्रियते कृत करणम्) (कर्तव्य करणीय कार्य कृत्य)
79. अर्चकः विष्णोः विग्रहान् स्पृशति।
(स्पृश् स्पृश्यते स्पृष्ट स्पर्शनम्/स्पर्शः)
(स्पर्ष्टव्य स्पर्शनीय स्पृश्य)
80. भगवान् शिवः विषम् (नपुं) पिबति।
(पा पीयते पीत पानम्)
81. बहवः कवयः विष्णुम् अवलोकयन्ते।
(अव+लोक् लोक्यते लोकित लोकनम्)
(लोकयितव्य लोकनीय लोक्य)
82. पार्वती (स्त्री) परिस्थितिम् (स्त्री) बोधति।
(बुध् बुध्यते बुद्ध बोधनम्) (बोद्धव्य बोधनीय बोध्य)
83. प्रखरः अनलः वनानि (नपुं) दहति।
(दह् दह्यते दग्ध दहनम्/दाहः)
84. जनः सकलम् राज्यम् (नपुं) गोपायति।
(गुप् गुप्यते गुप्त गोपनम्/गुप्तिः) (गोपयितव्य/ गोपितव्य गोपनीय/गोपायनीय गोप्य)
85. वीरः रामः क्रूरान् राक्षसान् संहरति।
(सम्+हृ ह्रियते हृत हरणम्/हृतिः/हारः )
86. व्याघ्रः मांसम् (नपुं) बलवान् भक्षयते।
(भक्ष भक्ष्यते भक्षित भक्षणम्)
87. दानवः प्रचण्डम् रविम् विस्मरति।
(वि+स्मृ स्मर्यते स्मृत स्मरणम्/स्मृतिः)
88. स्थूलः जनः यानात् (7) अवरोहति।
(अव+रुह् रुह्यते रूढ रोहणम्)
89. चपलः सर्पः स्थूलान् मण्डूकान् भक्षयते।
(भक्ष् भक्ष्यते भक्षित भक्षणम्)
90. महात्मा कर्म (नुपं) अनुतिष्ठति। (कर्मन्)
(स्था स्थीयते स्थित स्थानम्/स्थितिः)
(अनुष्ठीयते, अनुष्ठित, अनुष्ठानम्)
(अनुष्ठातव्य अनुष्ठानीय अनुष्ठेय)
91. नम्रः भृत्यः अधिकम् भारम् वहति।
(वह् उह्यते ऊढ वहनम्)(वोढव्य वहनीय वाह्य)
92. मनः (नपुं) वेधसम् चिन्तयति।
(चिन्त् चिन्त्यते चिन्तित चिन्तनम्/चिन्ता)
(चिन्तयितव्य चिन्तनीय चिन्त्य)
93. गुरवः राज्यस्य वने (7) वसन्ति।
(वस् उष्यते उषित वासः/वसनम्/उष्टिः)
(वस्तव्य वसनीय वास्य)
94. पीनः (fat) बन्धुः सर्वत्र शेते।
(शी शय्यते शयित शयनम्)
95. शिशुः परीक्षायाम् उत्तरम् (नपुं) लिखति।
(लिख् लिख्यते लिखित लेखनम्)
96. अहम् वेदद्रष्टारम् ऋषिम् भृगुम् सेवे।
(सेव् सेव्यते सेवित सेवनम्/सेवा)
97. दैत्याः ऋषिम् शाण्डिल्यम् विस्मरन्ति।
(वि+स्मृ स्मर्यते स्मृत स्मरणम्/स्मृतिः)
98. भारती (स्त्री) कलाम् (स्त्री) अवगच्छति।
(अव+गम् understand अवगम्यते अवगत अवगमनम्)
99. दैत्यः सुन्दरान् कवीन् विस्मरति।
(वि+स्मृ स्मर्यते स्मृत स्मरणम्/स्मृतिः)
100. चारुः नृपः अपि कार्तिकम् प्रणमति।
(प्र+नम् प्रणम्यते प्रणत प्रणमनम्/प्रणामः)

101. बटुः कल्पम् अधीते। (शानच् अधीयान)
(अधि+इङ् अधीयते अधीत अध्ययनम्)
(अधीते अधीयाते अधीयते) (एतव्य अयनीय इत्य एय – अध्येतव्य अध्ययनीय अधीत्य अध्येय)

102. वादी स्वमतं (नपुं) समर्थयति।
(सम्+अर्थ अर्थ्यते अर्थित अर्थनम् support) (अर्थयितव्य अर्थनीय अर्थ्य)

103. महान् गुरुः एव एवम् अत्र निवसति।
(नि+वस् नि+उष्यते-न्युष्यते नि+उषित - न्युषित निवासः)

104. असुरः चामुण्डाम् देवीम् (स्त्री) अर्चति।
(अर्च् अर्च्यते अर्चित अर्चनम्)

105. गुणी बालकः जननीम् (स्त्री) अनुगच्छति।
(अनु+गम् गम्यते गत गमनम्)

106. शिष्यः छन्दः (छन्दस् नपुं) अधीते।
(अधि+इङ् अधीयते अधीत अध्ययनम्)
(for शानच् - अधीते अधीयाते अधीयते)

107. परमात्मा रामः जनकम् सान्त्वयति।
(सान्त्व् सान्त्व्यते सान्त्वित सान्त्वनम्)
(सान्त्वयितव्य सान्त्वनीय सान्त्व्य)

108. स्थूलः भिक्षुः लघु काव्यम् (नपुं) लिखति।(लिख् लिख्यते लिखित लेखनम्)

109. ऋषिः पाणिनिः सूत्राणि (नपुं) लिखति।
(लिख् लिख्यते लिखित लेखनम्)

110. उचितम् औषधं(नपुं) तीव्रं ज्वरं क्षयति।
(क्षि reduce क्षीयते क्षित/क्षीण क्षयः)
(क्षेतव्य क्षयणीय क्षेय)

111. नृपः कृष्णः पशुपतिम् स्मरति।
(स्मृ स्मर्यते स्मृत स्मरणम्/स्मृतिः)

112. शिष्यः उत्तराणि मनति।
(म्ना (अभ्यासे) म्नायते म्नान म्नान)
(म्नातव्य म्नानीय म्नेय)

113. कृपालुः गुरुः धीमन्तम् शिष्यम् उपदिशति।
(उप+दिश् दिश्यते दिष्ट देशः/देशनम्)
(उप+देष्टव्य देशनीय देश्य)

114. आचार्यः शिष्टाचारम् आमनति।
(hand down traditionally)
(आ+म्ना आम्नायते आम्नान आम्नान)
(आम्नातव्य आम्नानीय आम्नेय)

115. सर्वे वेदाः यत् पदम्(नपुं) आमनन्ति।
(consider, regard, said to be)

116. तरणपटुः युवकः नदीम् (स्त्री) तरति।
(तॄ तीर्यते तीर्ण तरणम्)

117. बुद्धिमान् बालः दीर्घम् पाठम् पठति।
(पठ् पठ्यते पठित पठनम्/पाठः)

118. लोभी (इन्) रावणः सीताम् (स्त्री) हरते।
(हृ ह्रियते हृत हरणम्)

119. तेजस्वी (इन्) रविः सिन्धुम् ईक्षते।
(ईक्ष् see ईक्ष्यते ईक्षित ईक्षणम्) (ईक्षितव्य ईक्षणीय ईक्ष्य)

120. अविवेकी जातिधर्मान् उत्सादयति।
(bring to ruin) (उत्+सद्+णिच् उत्साद्यते उत्सादित उत्सादनम्)
(उत्सादितव्य उत्सादनीय उत्साद्य)

121. भगवान् रामः भगवन्तम् रविम् नमति।
(नम् नम्यते नत नमनम्)

122. विद्यार्थी पुस्तकम् रटति।(memorize) (रट् रट्यते रटित रटनम्) (रटितव्य रटनीय रट्य)

123. अधार्मिकः उत्सीदति। (उत्+सद् fall into ruin उत्सद्यते उत्सन्न उत्सदनम्/उत्सादः)

124. भयेन हृदयम् (नपुं) स्फुरति।(throb, palpitate) (स्फुर् स्फुर्यते स्फुरित स्फुरणम्) (स्फुरितव्य स्फुरणीय स्फुर्य)

125. शिशुः फलम् (नपुं) तुडति। (break) (तुड् तुड्यते तुडित तोडनम्) (तुडितव्य तुडनीय तोड्य)

126. तक्षा (तक्षन् पुं) काष्ठं पिशति। (break into pieces, rend, tear, grind) (पिश् पिश्यते पिष्ट पेशनम्) (पेशितव्य पेशनीय पेश्य)

127. जनः हस्तं कर्मणि व्यापारयति। (make busy, employ) (वि+आ+पृ+णिच् व्याप्रियते व्यापारित व्यापारः) (व्यापारयितव्य व्यापारणीय व्यापार्य)

128. हस्तः कर्मणि व्याप्रियते। (busy, occupied, engaged) (वि+आ+पृ व्याप्रियते व्यापृत व्यापारः/ व्यापृतिः) (व्यापर्तव्य व्यापरणीय व्यापार्य)

129. सीता (स्त्री) स्वामिनम् रामम् आह्वयति। (आ+ह्वे हूयते हूत ह्वानम्) (ह्वातव्य ह्वानीय ह्वेय)

130. श्रद्धालुः छात्रः भगवन्तम् रामम् वन्दते। (वन्द् वन्द्यते वन्दित वन्दनम्/वन्दना)

131. पत्रं पुष्पं फलं तोयं यः मे भक्त्या प्रयच्छति। (प्र+दा दीयते दत्त दानम्)(दातव्य दानीय देय)

132. पुरुषः हि प्रकृतिजान् गुणान् भुङ्क्ते। (भुज् भुज्यते भुक्त भोगः/भोजनम्/भुक्तिः) (भोक्तव्य भोजनीय भोज्य भोग्य)

133. लङ्कायां रामः रावणम् जयति। (जि जीयते जित जयः)

134. धीमान् वैद्यः रुग्णम् (पुं) स्पृशति। (स्पृश् स्पृश्यते स्पृष्ट स्पर्शः/ स्पर्शनम्)

135. गुणी (गुणिन्) भानुः लेखम् लिखति। (लिख् लिख्यते लिखित लेखनम्)

136. योगी देहम् मुञ्चति। (योगिन्) (मुञ्च् मुच्यते मुक्त मोचनम्/मोक्षः)

137. वणिक् रूप्यकाणि (नपुं) गणयति। (गण गण्यते गणित गणनम्/गणना) (गणयितव्य गणनीय गण्य)

138. मातामही (स्त्री) विपदम् (स्त्री) बोधति। (बुध् बुध्यते बुद्ध बोधनम्)(विपद् अन्ते द्)

139. बलिः देवम् वामनम् वन्दते। (वन्द् वन्द्यते वन्दित वन्दनम्/वन्दना)

140. शिवः ढक्काम् (स्त्री) सकृत् नादयति। (नद्+णिच् नाद्यते नादित नादः) सकृत् - once (नादयितव्य नादनीय नाद्य)

141. मुनिः वारुणिः ताराम् (स्त्री) पूजयति। (पूज् पूज्यते पूजित पूजनम्/पूजा)

142. लोभी (लोभिन्) धनम् (नपुं) अर्जति। (अर्ज् अर्ज्यते अर्जित अर्जनम्)

143. विद्यावान् गुरुः तिरुपतिम् याति। (या यायते यात यानम्) (यातव्य यानीय येय)

144. बलवान् देशम् गोपायति सैनिकः।
(गुप् गुप्यते गुप्त गोपनम्)
145. पटुः चोरः हरति गुप्तम् धनम् (नपुं)।
(हृ ह्रियते हृत हरणम्/हृतिः/हारः)
146. मनुः महर्षिः धर्मम् उपदिशति।
(उप+दिश् दिश्यते दिष्ट देशः/देशनम्)
147. गणयति मूर्खः नक्षत्राणि (नपुं)।
(गण गण्यते गणित गणनम्/गणना)
148. धनवान् गोपः दुग्धवतीम् धेनुम्(स्त्री) नयते। (नी नीयते नीत नयनम्)
149. मेधावी शिष्यः निरुक्तम् (नपुं) अधीते।
(अधि+इङ् अधीयते अधीत अध्ययनम्)
150. भूतग्रामम् इमम् विसृजामि पुनः पुनः।
(वि+सृज् सृज्यते सृष्ट सर्जनम्/सृष्टिः)
(स्रष्टव्य सर्जनीय सृज्य)
151. क्लान्तः प्रवासी(इन्)पर्वते (नपुं) सीदति। (सद् sit सद्यते सन्न सदनम्/सादः)

**The genders of the words hereafter are to be infered by oneself.**

152. पीनः देवदत्तः नद्यां मज्जति। (bathe)
(मस्ज् मज्ज्यते मग्न मज्जनम्/मज्जना)
(मङ्क्तव्य मज्जनीय मद्ग्य)
153. बुभुक्षुः नरः पाणिम् प्रक्षालयति।
(प्र+क्षाल् क्षाल्यते क्षालित क्षालनम्)
(क्षालयितव्य क्षालनीय क्षाल्य)
154. दयालुः हरिः सकलं पापम् (नपुं) हरते।
(हृ ह्रियते हृत हरणम्/हारः/हृतिः)
155. सुन्दरः सुरः पीयूषम् (नपुं) पिबति।
(पा पीयते पीत पानम्)
156. इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।
(हृ ह्रियते हृत हारः/हरणम्/हृतिः)
157. महारथी (इन्) अर्जुनः प्रभासम् याति।
(या यायते यात यानम्)
158. पितामही (स्त्री) पूजाम् (स्त्री) बोधति।
(बुध् बुध्यते बुद्ध बोधनम्)
159. बलवान् दस्युः प्रयागम् याति।
(या यायते यात यानम्)
160. सः वामनः शेवम् (height) माति।
(मा measure मीयते मित मानम्) (मातव्य मानीय मेय)
161. जनः बहून् प्रज्ञान् वर्णयति।
(वर्ण् वर्ण्यते वर्णित वर्णनम्/वर्णना)
162. बुद्धिमान् छात्रः लघु स्तोत्रम् लिखति।
163. हरिताः वृक्षाः प्राणवायुम् उत्सृजन्ति।
(उत्+सृज् सृज्यते सृष्ट सर्जनम्/सृष्टिः)
164. व्रती (व्रतिन् पुं) फलानि भक्षयति।
(भक्ष भक्ष्यते भक्षित भक्षणम्)
165. द्रोणस्य पुत्रः तद् ब्रह्मास्त्रम् क्षिपति।
(क्षिप् क्षिप्यते क्षिप्त क्षेपणम्/क्षेपः)(क्षेप्तव्य क्षेपणीय क्षेप्य)
166. तेऽपि च अतितरन्ति एव मृत्युम्(पुं)।
(तॄ तीर्यते तीर्ण तरणम्/तारः)
167. मेधावी (इन्) कविः श्लोकान् लिखेत्।
(लिख् लिख्यते लिखित लेखनम्)
168. बलवान् स्तेनः सम्पत्तिम्(स्त्री) अपाहरत्।
(अप+हृ ह्रियते हृत हरणम्)
169. भगवान् वायुः वेदान् पठिष्यति।

170. ऋषिः कुत्र भानुम् पश्यति।
(दृश् दृश्यते दृष्ट दर्शनम्)
171. किङ्करः बहुम् भारम् वहति।
(वह् उह्यते ऊढ वहनम्)
172. गुणी कविः मुनिम् मनुम् पश्यति।
(दृश् दृश्यते दृष्ट दर्शनम्)
173. बलवान् रक्षति बन्धुः माम्।
(रक्ष् रक्ष्यते रक्षित रक्षणम्/रक्षा)
174. एषः प्रवासी यानम् (नपुं) आरोहति।
(आ+रुह् रुह्यते रूढ रोहणम्)
175. रत्नम् (नपुं) चोरयति पटुः स्तेनः।
(चुर् चोर्यते चोरित चोरणम्)
176. गर्विताः पण्डिताः वादम् इच्छन्ति।
(इष् इष्यते इष्ट एषणम्/इच्छा)
177. महान् देवः विद्याम् (स्त्री) पूजयते।
(पूज् पूज्यते पूजित पूजा/पूजनम्)
178. बलिः आकाशे कदा विधुम् पश्यति।
(दृश् दृश्यते दृष्ट दर्शनम्)
179. राज्ञः कुमारी विज्ञानम् (नपुं) लभते।
(लभ् लभ्यते लब्ध लाभः/लब्धिः)
(लब्धव्य लम्भनीय लभ्य)
180. यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति। (हृष्यते हृष्ट हर्षः। द्विष्यते द्विष्ट द्वेषः। शुच्यते शोचित शोकः। काङ्क्ष्यते काङ्क्षित काङ्क्षा।) (हर्षितव्य हर्षणीय हृष्य) (द्वेष्टव्य द्वेषणीय द्वेष्य) (शोचितव्य शोचनीय शोच्य)
181. देवी (स्त्री) सर्वाम् विद्याम् (स्त्री) बोधति।
(बुध् बुध्यते बुद्ध बोधनम्)

182. एषः पश्यति हरिः विभुम्।
(दृश् दृश्यते दृष्ट दर्शनम्)
183. देवी (स्त्री) विश्वम् (नपुं) तनोति।
(तन् तन्यते/तायते तत तानम्/ततिः)
(तनितव्य तननीय तान्य)(तनोति तनुतः तन्वन्ति)
184. भगवान् ब्रह्मा विश्वम् (नपुं) सृजति।
(सृज् सृज्यते सृष्ट सर्जनम्)
185. भगवान् शम्भुः जगत् (नपुं) विसृजति।
(वि+सृज् सृज्यते सृष्ट सर्जनम्/सृष्टिः)
186. परिश्रमी(इन्) कृषीवलः वृक्षान् सिञ्चति।
(सिच् सिच्यते सिक्त सेचनम्)
187. इन्द्रजित् काम् शक्तिम् (स्त्री) क्षिपति।
(क्षिप् क्षिप्यते क्षिप्त क्षेपणम्/क्षेपः)
188. शिष्यः वेदङ्गानि अधीते।
(अधि+इङ् अधीयते अधीत अध्ययनम्)
(अधीते अधीयाते अधीयते)
189. तत्र भृगुः एवम् वेदान् पठति।
(पठ् पठ्यते पठित पठनम्/पाठः)
190. भगवती परिपालयति चण्डिका (स्त्री) समग्रं जगत् (नपुं)। (परि+पाल् पाल्यते पालित पालनम्) (पालयितव्य पालनीय पाल्य)
191. अत्र देवदत्तः वेदार्थान् अधिगच्छति।
(अधि+गम् get गम्यते गत गमनम्)
192. क्षुधार्तः भिक्षुकः व्रीहीन् उञ्छति।
(उञ्छ् उञ्छयते उञ्छित उञ्छनम्)
(उञ्छितव्य उञ्छनीय उञ्छय)

193. रामस्य कः सुतः शंकरम् सेवते।
(सेव् सेव्यते सेवित सेवनम्/सेवा)
194. देशस्य नृपः कान् शठान् दण्डयते।
(दण्ड दण्ड्यते दण्डित दण्डः/दण्डनम्)
(दण्डयितव्य दण्डनीय दण्ड्य)
195. युद्धे कः योधः शरान् क्षिपति।
(क्षिप् क्षिप्यते क्षिप्त क्षेपणम्/क्षेपः)
196. एकः मानवः शान्तिम् (स्त्री) लभते।
(लभ् लभ्यते लब्ध लाभः/लब्धिः)
197. सः शिशुः भगवन्तम् शिवम् ध्यायति।
(ध्यै ध्यायते ध्यात ध्यानम्) (ध्यातव्य ध्यानीय ध्येय)
198. अहम् तम् शिवम् सेवे।
(सेव् सेव्यते सेवित सेवनम्/सेवा)
199. श्रद्धालुः ताम् शिवाम् (स्त्री) अर्चति।
(अर्च् अर्च्यते अर्चित अर्चनम्)
200. सा देवी (स्त्री) शुभानि (नपुं) विदधाति।
(वि+धा विधीयते विहित विधानम्)
(धातव्य धानीय धेय)(विदधाति- bestow, grant)
201. एते दुर्जनाः तान् सज्जनान् पीडयन्ते।
(पीड् पीड्यते पीडित पीडनम्/पीडा)
202. देवः रामः भगवन्तम् शूलपाणिम् स्मरति। (स्मृ स्मर्यते स्मृत स्मरणम्/स्मृतिः)
203. अयं प्रसन्नः गणेशः समृद्धिम् (स्त्री) दत्ते।
(दा दीयते दत्त दानम्) (दत्ते ददाते ददते)
204. एषः श्वेतः शुनकः सस्यम् (नपुं) पाति।
(पा protect पायते पात पायः/पालः)
(पातव्य पानीय पेय पाल्य)
205. पश्य मे पार्थ रूपाणि।
206. हतो वा प्राप्स्यसि स्वर्गं(पुं) जित्वा वा भोक्ष्यसे महीम् (स्त्री) त्वम्।
(प्र+आप् प्राप्यते प्राप्त प्रापणन्)
(भुज् भुज्यते भुक्त भोगः) (आप्तव्य आपनीय आप्य)
207. त्वम् इमां सीताम् (स्त्री) अवदः।
(वद् उद्यते उदित वदनम्/वादः) (वदितव्य वदनीय वाद्य)
208. ते दिवि(7) दिव्यान् देवभोगान् अश्नन्ति।
(अश् अश्यते अशित अशनम्/आशः/अष्टिः) (अशितव्य अशनीय आश्य)
209. तस्मिन् गर्भम् (पुं) दधामि अहम्।
(धा धीयते हित धानम्)(धातव्य धानीय धेय)
210. न मे भक्तः प्रणश्यति।
(प्र+नश् नश्यते नष्ट नाशः/नशनम्)
(नशितव्य नंष्टव्य नशनीय नश्य)
211. योगक्षेमम्(नपुं) वहामि अहम्।
(वह् उह्यते ऊढ वहनम्)
212. सोमपाः स्वर्गतिम् (स्त्री) प्रार्थयन्ते।
(प्र+अर्थ अर्थ्यते अर्थित अर्थनम्/अर्थना)
(अर्थयितव्य अर्थनीय अर्थ्य)
213. यः माम् अजम् अनादिम् च वेत्ति।
(विद् विद्यते विदित वेदः/विद्या/वेदना)
(वेदितव्य वेदनीय वेद्य)(वेत्ति वित्तः विदन्ति)
214. सर्वम् एतद् ऋतम् मन्ये अहम्।
(मन् मन्यते मत मननम्/मतिः) (मन्तव्य मननीय मान्य)
215. अवजानन्ति माम् मूढाः।
(अव+ज्ञा ज्ञायते ज्ञात अवज्ञानम्/अवज्ञा)
(ज्ञातव्य ज्ञानीय ज्ञेय)

216. भूयः एव महाबाहो शृणु मे परं वचः (नपुं)।
(श्रु श्रूयते श्रुत श्रवणम्/श्रुतिः) (श्रोतव्य श्रवणीय श्रव्य)
217. अवाच्यवादान् बहून् वदिष्यन्ति तव अहिताः।
(वद् उद्यते उदित वादः/वदनम्)
218. न च मां तानि कर्माणि निबध्नन्ति धनञ्जय। (बध् बध्यते बद्ध बन्धनम्/बन्धः) (बन्धव्य बन्धनीय बन्ध्य)
219. न इह अभिक्रमनाशः अस्ति।
(अस् भूयते भूत भवनम्/भावः/भूतिः))
220. यो (यः) मां पश्यति सर्वत्र सर्वंम् च मयि पश्यति।(गीता-6.30) (दृश् दृश्यते दृष्ट दर्शनम्)
221. यदा संहरते च अयम् कूर्मः अङ्गानि।
(सम्+हृ ह्रियते हृत हारः/हरणम्/हृतिः)
222. दिव्यं ददामि ते चक्षुः(नपुं) अहम्।
(दा दीयते दत्त दानम्)(चक्षुस्)
223. जनः इदं सुभाषितम् (नपुं) अलिखत्।
224. प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्। (प्र+हा हीयते हीन हानिः) (हातव्य हानीय हेय)
225. भावसमन्विताः बुधाः माम् भजन्ते।
(भज् भज्यते भक्त भजनम्/भक्तिः)
226. पश्यामि देनान् तव देव देहे सर्वान् तथा भूतविशेषसंघान्।
227. इयं सुन्दरी गौरी सुखम् (नपुं) अर्जति।
(अर्ज् अर्ज्यते अर्जित अर्जनम्)
228. स्वर्णकारः इदं सुवर्णम् (नपुं) तोलयति।
(तुल् तुल्यते तुलित तोलनम्/तोलः)
229. असौ सैनिकः सेनाम् (स्त्री) अवगच्छति।
(अव+गम् गम्यते गत गमनम्)
230. वयम् सेवाम् (स्त्री) अवगच्छामः।
(अव+गम् गम्यते गत गमनम्)
231. दानवशत्रुः देवः अमुम् सोमरसम् लभेत।
(लभ् लभ्यते लब्ध लाभः/लब्धिः)
232. कश्चित् गुणी मानुषः ईश्वरं हरम् नमेत्।
233. कश्चित् दयालुः देवः माम् कर्तारं स्मरतु।
234. हर्ता हरिः आत्मनः हस्तौ क्षालयति।
(क्षाल् क्षाल्यते क्षालित क्षालनम्)
235. एषः भ्राता लक्ष्मणः त्वाम् उपदिशति।
(उप+दिश् दिश्यते दिष्ट देशः/देशनम्)
236. उत्साहिनः(इन्) इमे बालाः अक्रीडन्।
(क्रीड् क्रीड्यते क्रीडित क्रीडनम्/क्रीडा) (क्रीडितव्य क्रीडनीय क्रीड्य)
237. वृद्धायाः बुद्धिः (स्त्री) इदानीम् क्षयति।
(क्षि क्षीयते क्षित/क्षीण क्षयः)
238. गोपालस्य धेनुः (स्त्री) गोवर्धने अचरत्।
(चर् चर्यते चरित चरणम्) (चरितव्य चरणीय चर्य)
239. कृष्णस्य अजः वृन्दावने एव अचरत्।
(चर् graze चर्यते चरित चरणम्)
240. वृद्धस्य मतिः कदा इत्थम् क्षयति।
241. अयोध्यायाः नृपः रामः जयति।
(जि जीयते जित जयः)
242. शीतलम् स्वादु जलम् (नपुं) द्रवति।
(द्रु flow, run, ooz द्रूयते द्रुत द्रव)
(द्रोतव्य द्रवणीय द्रव्य/द्राव्य)

243. माणवकः उपद्रवति, पश्चात् विद्रवति च।
(उपद्रवं करोति, अनिष्टम् उत्पादयति। पश्चात् पलायति)
244. रक्षांसि भीतानि दिशो द्रवन्ति।(run)
(दिक् (स्त्री) दिशा)
245. रावणः रामम् उपद्रवति। (attack)
246. हृदयम् (नपुं) द्रवति। (पिघलना, तरल होना)
247. अयम् सितः अश्वः वेगेन धावति।
(धाव् धाव्यते धावित धावनम्) (धावितव्य धावनीय धाव्य)
248. महती ढक्का तत्र मेलायाम् नदति।
(नद् नद्यते नदित नादः) (नदितव्य नदनीय नद्य)
249. भूमौ इदम् शुष्कं पर्णम् अपतत्।
(पत् पत्यते पतित पतनम्/पातः)
250. संस्कृताध्यनेन महान् आनन्दः भवति।
(भू भूयते भूत भवनम्)
251. असौ वृक्षः भूमौ रोहति।
(रुह् रुह्यते रूढ रोहणम्)
252. इयम् माता सीता महति वने तिष्ठति।
(स्था स्थीयते स्थित स्थानम्/स्थितिः)
(स्थातव्य स्थानीय स्थेय)
253. इदम् यानम् स्थानके तिष्ठति।
254. चालकः (driver) यानम् स्थानके स्थापयति। (to halt, stop)
(स्था+णिच् स्थाप्यते स्थापित स्थापनम्)
(स्थापयितव्य स्थापनीय स्थाप्य)
255. वनवासी(पुं) रामः पञ्चवट्यां वसति।
(वस् उष्यते उषित वसनम्/वासः/वसिः)
256. कुलीना रमणी जनेषु व्रीड्यति।
(व्रीड् shy व्रीड्यते व्रीडित व्रीडनम्/व्रीडा)
257. सर्वभूतानि कौन्तेय प्रकृतिम् यान्ति मामिकाम्। (या यायते यात यानम्)
258. सर्वः अन्धकारः सूर्योदये नश्यति।
(नश् नश्यते नष्ट नाशः)
259. रविः प्रातः आकाशे उद्गच्छति।
260. ब्रह्मज्ञानम् आत्मानम् मुञ्चति।
(मुञ्च् मुच्यते मुक्त मोचनम्/मोक्षः)
261. कः कस्मै कुत्र कदा किम् भणति।
(भण् speak भण्यते भणित भणनम्)
262. कः राजा केषाम् भूमिम् (स्त्री) भरति।
(भृ भ्रियते भृत भरणम्/भृतिः)
263. रोगी (रोगिन्) औषधिम् (स्त्री) सेवते।
(सेव् सेव्यते सेवित सेवनम्/सेवा)
264. अहं त्वाम् वन्दे।
(वन्द् वन्द्यते वन्दित वन्दनम्/वन्दना)
265. सः माम् पश्यति।
266. त्वम् माम् वन्दसे।
267. ते अस्मान् सेवन्ते।
268. वयम् युष्मान् परीक्षामहे।
(ईक्ष् see ईक्ष्यते ईक्षित ईक्षणम्/ईक्षा)
269. कः काम् पश्यति।
270. यूयम् तान् वन्दध्वे।
271. का ताम् नमति।
272. अयम् अमुम् नयति।
273. एषा कान् भाषते।
(भाष् भाष्यते भाषित भाषणम्)
274. असौ इमम् आनयति।
(नी नीयते नीत नयः/नयनम्)

275. वन्दे देवमुमापतिम् सुरगुरुम्।
276. वन्दे पन्नगभूषणम्।
277. विमलपरमहंसम् रामकृष्णम् स्मरामि।
278. पाण्डवाः किम् अकुर्वत।
279. युयुत्सवः कुरुक्षेत्रम् समवयन्ति।
(सम्+अव+इ, समवेयते समवेत समवायः/ समवायनम्)
280. राजा दुर्योधनः वचनम् अब्रवीत्।
(ब्रू उच्यते उक्त वचनम्/वाक्/उक्तिः)
(वक्तव्य वचनीय वाच्य वाक्य)
281. द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तम।
(इष् इष्यते इष्ट इच्छा/एषणा)
282. स्थितधीः (पुं) किम् प्रभाषेत।
283. स मनोगतान् सर्वान् कामान् प्रजहाति।
(हा हीयते हित हानम्/हानिः)
284. स्थितधीः मुनिः उच्यते।
285. अयम् इन्द्रियाणि संहरते।
286. संज्ञार्थम् अहम् तान् ते ब्रवीमि।
287. भवन्तः सर्वे भीष्मम् एव अभिरक्षन्तु।
288. इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः।
289. तयोः न वशम् आगच्छेत्। (कोऽपि)
290. ये यथा मां प्रपद्यन्ते तान् तथैव भजामि अहम्। (पद् पद्यते पन्न पदम्)
291. मम वर्त्म अनुवर्तन्ते मनुष्याः पार्थ सर्वशः।
(वृत् वृत्यते वृत्त वर्तनम्/वृत्तिः)
292. न मां कर्माणि लिम्पन्ति।
(लिप् लिप्यते लिप्त लेपः)
293. इति माम् यः अभिजानाति कर्मभिः न स बध्यते। (बध् बध्यते बद्ध बन्धः)
294. नैव किञ्चित् करोति सः।
295. श्रोत्रादीनि इन्द्रियाणि अन्ये संयमाग्निषु जुह्वति। (हु हूयते हुत हुतिः)
296. प्रकाशयति एकः कृत्स्नम् लोकम् इमम् रविः। (प्र+काश्+णिच् काश्यते काशित काशः)
297. अपरे नियताहाराः प्राणान् प्राणेषु जुह्वति।
298. यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्।
299. यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन।
300. ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा।
301. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
302. तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति।
303. श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
304. ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।
305. आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय।
(बध् बध्यते बद्ध बन्धनम्/बन्धः)
306. अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।
307. सीदन्ति मम गात्राणि मुखं च परिशुष्यति।
(शुष् शुष्यते शुष्क शोषणम्)
308. नायं लोकोऽस्ति।
309. वेपथुश्च शरीरे मे रोमहर्षश्च जायते।
310. गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते।

311. भ्रमतीव च मे मनः।

312. निमित्तानि च पश्यामि विपरीतानि केशव।

313. न काङ्क्षे विजयं कृष्ण।

314. कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः।

315. नरके नियतं वासो भवति।

316. आत्मा प्रसादम् अधिगच्छति।

317. स योगी मयि वर्तते।

318. मनः प्रज्ञां हरति यथा वायुः अम्भसि नावम् हरति।

319. यावदेतान्निरीक्षेऽहं योद्धुकामान् अवस्थितान्।

320. न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे।

321. पश्य एताम् पाण्डुपुत्राणाम् आचार्य महतीम् चमूम्।

322. द्रूपदपुत्रः तव शिष्यः धीमान् एताम् चमूम् विवहति।

323. यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।

324. पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः।

325. मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।

326. एतस्याहं न पश्यामि चञ्चलत्वात् स्थितिं स्थिराम्।

327. सर्वभूतस्थितं यो मां भजति एकत्वमास्थितः।

328. स शान्तिम् अधिगच्छति।(get)

329. मया पुरा द्विविधा निष्ठा प्रोक्ता।

330. स सिद्धिम् समधिगच्छति। (get)

331. यः कर्मैन्द्रियैः कर्मयोगम् आरभते सः असक्तः विशिष्यते।

332. नियतं कर्म कुरु त्वम्।

333. कौन्तेय मुक्तसङ्गः त्वम् कर्म समाचर।

334. यूयम् परम् श्रेयः अवाप्स्यथ। (अव+आप् अवाप्यते अवाप्त अवापः)

335. यः भोगान् भुङ्क्ते स स्तेन एव। (भुज् भुज्यते भुक्त भोजनम्/भोगः)

336. सन्तः सर्वकिल्बिषैः मुच्यन्ते।

337. त्वं यशो लभस्व। (यशस् नपुं)

338. मया एते निहताः पूर्वमेव। (नि+हन् हन्यते हत हननम्)

339. (तत् पुं) उवाच हृषीकेशः प्रसन्निव भारत।

340. न एतत् (त्वम्) उपपद्यते।

341. शरीस्थोऽपि कौन्तेय न करोति न लिप्यते।

342. रासभः प्रभुं नयति। प्रभुना रासभः नीयते।

343. गर्दभः वहति उह्यते च।

344. वृषः कर्षति कृष्यते च।

345. तरुणी न अपहरति न अपह्रियते।

346. राजा भृत्यम् आदिशति। (आज्ञापयति)

347. वेदाध्ययनम् अन्धश्रद्धाम् अपनुदति। (destroy)

348. रक्षांसि भीतानि दिशो द्रवन्ति।(run)

349. त्वया ततम् विश्वम् अनन्तरूप।

350. रुद्रादित्याः सर्वे त्वाम् वीक्षन्ते।(see)

351. धृतिं न विन्दामि।

352. केचिद् दशनान्तेषु विलग्नाः सन्दृश्यन्ते।

353. लोकाः तव वक्त्राणि विशन्ति।
354. न हि प्रजानामि तव प्रवृत्तिम्।
355. योऽयं योगः त्वया प्रोक्तः साम्येन मधुसूदन।
356. नादत्ते कस्यचित् पापं न चैव सुकृतं विभुः।
357. ज्ञानेन तु तदज्ञानं येषां नाशितम् आत्मनः।
358. सुखमात्मनि विन्दति।
359. सुखम् अक्षयम् अश्नुते।
360. ऋषयः ब्रह्मनिर्वाणं लभन्ते।
361. आम्रस्य रूपं परिणमते। फलस्य गन्धः विपरिणमते। फलभारेण वृक्षः अवनमति। गर्वेण शिरः उन्नमति। (णम्-नम् प्रह्वत्वे। परिणमते विपरिणमते (अन्यथा भवति।) अवनमति (अधो भवति) उन्नमति (उच्चो भवति)
362. यः एनां ब्राह्मीम् स्थितिं प्राप्नोति स न विमुह्यति।
363. मनसा यः इन्द्रियार्थान् स्मरति स मिथ्याचारः उच्यते।
364. प्रजापतिः सहयज्ञाः प्रजाः सृजति। ततः परं ब्रवीति।
365. यज्ञभाविताः देवाः वः इष्टान् भोगान् दास्यन्ते।
366. कथं (भीष्मः) अहम् इषुभिः संख्ये प्रतियोत्स्यामि।
367. असक्तः कर्म आचरति, अतः पूरुषः परम् आप्नोति
368. भृत्यः राजाज्ञां न प्रत्यादिशति। (निराकरोति)
369. दिशो न जाने। न लभे च शर्म। (दिक् स्त्री, शर्मन् नपुं)
370. अज्ञानेन आवृतं ज्ञानम्। तेन मुह्यन्ति जन्तवः।
371. इहैव तैर्जितः सर्गः। येषां साम्ये स्थितं मनः।
372. योत्स्यमानान् अवेक्षेऽहं य एतेऽत्र समागताः। (ईक्ष् अव+ईक्ष्यते ईक्षित ईक्षणम्/ईक्षा)
373. रक्षांसि(नपुं) रामं संख्ये प्रत्यर्थयन्ते। (प्रति+अर्थ challenge अर्थ्यते अर्थित अर्थनम्)
374. नान्तोऽस्ति मम दिव्यानां विभूतीनां परंतप। (अस् भूयते भूत भावः/भवनम्/भूतिः)
375. सत्त्वं(नपुं) देहिनम्(इन्) सुखे(7) सञ्जयति। (सञ्ज्+णिच् सञ्ज्यते सञ्जित सञ्जनम्)
376. सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्। (लभ् लभ्यते लब्ध लाभः/लब्धिः)
377. योगेश्वर मे त्वं दर्शय आत्मानम् अव्ययम्। (दृश्+णिच् दर्श्यते दर्शित दर्शनम्।
378. शिबिः मृगं(beast of pray) व्यापादयति। (वि+आ+पद्+णिच् व्यापाद्यते व्यापादित व्यापादनम्)
379. अधर्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः। (दुष् दुष्यते दुष्ट दोषः/दूषणम्)
380. समुद्रम् आपः प्रविशन्ति यद्वत्, तद्वत् कामाः यम् प्रविशन्ति सर्वे, स शान्तिम् आप्नोति न कामकामी।

## अभ्यासः -3: Govinda's journey - गोविन्दस्य प्रवासः

**Instruction -** Put the object i.e. the place where he goes in to द्वितीया
**Round-1:** Make just a simple sentence with Subject+Object+Verb combination. उदा. - गोविन्दः **हट्टम्** गच्छति। गोविन्दः **वनम्** गच्छति।
**Round-2:** Make sentences which will mean like –

1) Govinda goes to a temple from a forest.
2) Govinda goes to a well from the temple

उदा- छात्रः **मन्दिरात्** विद्यालयं गच्छति। Here, पञ्चमी is used to express the sense 'from'
**Round-3:** include the mode of transport as medium/करण.
उदा- छात्रः मन्दिरात् विद्यालयं **रथेन** गच्छति। Here, तृतीया is used to express the sense 'by'
**Round-4:** When the type of sentences for expressing time are taught, that should be practised here. Govinda goes to some place at such and such a time or day etc
**Round-5:** Further all the words can be replaced by other words ending in इ,ई etc



## अभ्यासः -4:

**Round-1:** column-wise – कृष्णाय नमः/स्वस्ति। शिवाय नमः।

**Round-2:** row-wise- कृष्णाय नमः। शारदायै नमः।

**Round-3:** विशेषण– 1) गुणिने कृष्णाय नमः 2)बुद्धिमत्यै शारदायै नमः 3) देव्यै मात्रे नमो नमः

**Round-4:** च 1) रामाय सीतायै च नमः, 2) हरये मतये च नमः, 3) विष्णवे धेनवे च नमः

**Round-5:** सप्रदान-आपादान 1) कृष्णात् फलम् आदाय शिवाय ददाति/ददातु/अददत्/दास्यति

**Round-6:** 1) कृष्णस्य फलम् सारदायै ददाति। 2) शारदायाः फलम् अग्नये ददाति

| 1 | 2 | 3 | 4 | 5 | 6 | 7 | 8 | 9 | 10 | 11 |
|---|---|---|---|---|---|---|---|---|---|---|
| राम | दुर्गा | हरि | विष्णु | देवी | मातृ | मरुत् | श्रीमान् | भगवान् | गुणी | सर्वनाम |
| **रामाय** | **दुर्गायै** | **हरये** | **विष्णवे** | **देव्यै** | **मात्रे** | **मरुते** | **श्रीमते** | **भगवते** | **गुणिने** | **पुं/स्त्री** |
| कृष्ण | शारदा | अग्नि | भानु | ईश्वरी | पितृ | आत्मन् | बुद्धिमान् | गुणवान् | गुणी | अस्मद् |
| शिव | विद्या | अतिथि | विधु | पार्वती | भ्रातृ | मनस् | धृतिमान् | ज्ञानवान् | ज्ञानी | युष्मद् |
| देव | कमला | यति | इन्दु | देवी | दुहितृ | वेधस् | मतिमान् | धनवान् | ब्रह्मचारी | तद् |
| हर | गिरिजा | विधि | सिन्धु | काली | कर्तृ | शिरस् | कीर्तिमान् | बलवान् | मनीषी | एतद् |
| गणेश | मेधा | रवि | स्थाणु | नदी | हर्तृ | सुहृद् | मूर्तिमान् | भाग्यवान् | मेधावी | किम् |
| शंकर | श्रद्धा | कवि | विभु | सती | धर्तृ | सम्पद् | कृतिमान् | विद्यावान् | त्यागी | इदम् |
| गोविन्द | शारदा | मारुति | प्रभु | गौरी | स्वसृ | वाच् | स्फूर्तिमान् | श्रद्धावान् | योगी | अदस् |
| कार्तिक | तारा | मुनि | मनु | चण्डी | धातृ | चेतस् | गतिमान् | चिन्तावान् | ध्यानी | पर |
| गदाधर | प्रभा | ऋषि | शम्भु | वाणी | स्रष्टृ | ब्रह्मन् | धीमान् | मेधावान् | स्वामी | अपर |

स्वस्ति - (f/n)- Welfare. (ind)- A particle meaning 'may it be well with (one)', 'fare-well', 'hail', 'adieu' (with dat.); उदा- स्वस्ति तेऽस्तु आन्तरिक्षेभ्यः पार्थिवेभ्यश्च भारत।

# अभ्यासः -5: Days and time

| | | | |
|---|---|---|---|
| मङ्गलवारः tue | प्र-पर-ह्यः | प्र-परह्यः कः वारः | आसीत् |
| बुधवारः wed | पर-ह्यः | परह्यः कः वारः | आसीत् |
| गुरुवारः thu | ह्यः yesterday | ह्यः कः वारः | आसीत् |
| शुक्रवारः fri | **अद्य today** | अद्+य कः वारः | अस्ति |
| शनिवारः sat | श्वः tomorrow | श्वः कः वारः | भविष्यति |
| रवि-वारः sun | परश्वः | पर-श्वः कः वारः | भविष्यति |
| सोमवारः mon | प्रपरश्वः | प्र-पर-श्वः कः वारः | भविष्यति |

| | | |
|---|---|---|
| | दशरथः | |
| कौशल्या | | सीता |
| रामः | | लवः |
| | कुशः | |

1. **दशरथस्य स्नुषा सीता।**
2. **दशरथस्य पत्नी कौशल्या।**
3. **दशरथस्य स्नुषायाः नाम सीता।**
4. **दशरथस्य पत्न्याः नाम कौशल्या।**
5. **दशरथः सीतायै फलम् ददाति।**
6. **दशरथः सीतायाः फलम् आददाति।**

381. कर्मणि घोरे माम् नियोजयसि केशव। (नि+युज्+णिच् नियोज्यते नियोजित नियोजनम्)

382. व्यामिश्रेण इव वाक्येन त्वम् मे बुद्धिम् मोहयसि इव। (मुह्+णिच् मोह्यते मोहित मोहः)

383. त्वम् एकं निश्चिनु, तद् एव वद, येन अहम् श्रेयः आप्नुयाम्।

384. ज्ञानम् अज्ञानम् अपनुदति। (दूरीकरोति) (णुद प्रेरणे नुद्यते नुन्न/नुत्त नोदनम्/नोदः